# श्लोकद्वयम्

गजेन्द्र मोक्षम्

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्य मारुह्य धावन्
    व्याघूर्णन् माल्यभूषा वसन परिकरो मेघ गंभीर घोषः।
आबिभ्राणो रथाङ्गं शरमसि मभयं शङ्ख चापौ सखेटौ
    हस्तैः कौमोदकी मप्यवतु हरिरसा वंहसां संहतेर्नः॥

नक्राक्रान्ते करीन्द्रे मुकुळित नयने मूल मूलेतिखिन्ने
    नाहं नाहं नचाहं न च भवति पुनस्तादृशो मादृशेषु
इत्येवं त्यक्तहस्ते सपदि सुरगणे भाव शून्ये समस्ते
    मूलं यत्प्रादुरासीत् स दिशतु भगवान् मङ्गळं सन्ततं नः॥

# श्लोकत्रयम्

प्रातः स्मरामि भवभीति महार्ति शान्त्यै
    नारायणं गरुड वाहन मञ्जनाभम्।
ग्राहाभि भूत मदवारण मुक्ति हेतुं
    चक्रायुधं तरुण वारिज पत्रनेत्रम्॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना
    पादारविन्द युगळं परमस्य पुंसः।
नारायणस्य नरकार्णव तारणस्य
    पारायण प्रवण विप्र परायणस्य॥

प्रातर्भजामि भजता मभयं करं तं
प्राक् सर्व जन्म कृत पाप भयापनुत्यै ।
यो ग्राहवक्त्र पतितान्घ्रि गजेन्द्र घोर
शोक प्रणाशन करो धृत शङ्ख चक्रः ॥

श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत्
लोकत्र्य गुरुस्तस्मै दध्यादात्मपदं हरिः ॥

॥ इति श्लोक द्वयं श्लोक त्रयम् ॥

**********



Hosted by tripod